# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेश परीक्षा

### प्रथमपत्रिका

Aug 2009(1)

दिनाङ्कः – ३०-८-२००९ | अङ्काः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् | समयः–घण्टात्रयम्

**1 पञ्चानां प्रश्नानां एकैकवाक्येन उत्तरं लिखत ।** 5

१. भवताप भीतः केन परिपाल्यः ?
२. जगन्नाथेन आत्मा कस्मै निवेदितः ?
३. श्रीशङ्करः कस्मिन् वयसि सकलवर्णं समग्रहीत् ?
४. मुद्राराक्षस नाटकस्य रचयिता कः ?
५. शिष्याः दुर्वाससं किमाहुः ?
६. शकुन्तलायाः सख्यौ कौ ?
७. लक्ष्मणसूरिणः पिता कः ?

**2 पञ्चानां प्रश्नानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. कुतः मुद्राराक्षस नाटकम् अपूर्वा कृतिः भवति ?
२. कालिदासकृतयः के ?
३. शकुन्तलायाः कृते वनस्पतिभिः किं किं दत्तम् ?
४. हनुमन्तं दृष्ट्वा रावणः किं अमंस्त ?
५. प्रतिशापदानोद्यतां सावित्रीं सरस्वती किमाह ? ।
६. शोकस्य नावकाशः इति कुतः भीष्मः वदति ?
७. श्रीकृष्णस्य मन्त्रण सभा कथमासीत् ?

**3 पञ्चषैः वाक्यैः द्वयोः उत्तरं लिखत ।** 8

१. कथंभूतं श्रीकृष्णं युधिष्ठिरः अपश्यत् ?
२. श्रीशङ्कराचार्यस्य शैशव वैदुष्यं कथं आसीत् ?



पश्चादनुवर्तते

३. ब्रह्मलोकं विवृणुत ।

४. रावणं प्रति हनुमान् किमवदत् ?

**4 वाक्यत्रयं सप्रसङ्गं व्याख्यात ।** 9

१. अतिमृदोः मस्तकमारोहति हस्तिन इव हस्तिपकः ।

२. क्षमाहिमूलं सर्वतपसाम् ।

३. महीयांसः प्रकृत्या मितभाषिणः ।

४. तदपि प्रवर्तयति मां शङ्करपारम्यसङ्कथालोभः ।

५. तेन हि स्वाधीनोपाया शकुन्तला भविष्यति ।

**5 द्वयोः भावं स्पष्टयत ।** 8

१. शिवगुरुः स जरंत्रिसमेशिशावमृत कर्मवराः सुतमोदितः ।
उपनिनीषित सूनुरपिस्वयं न हि यमोऽस्य कृताकृतमीक्षते ।।

२. यात्येकतोऽस्तशिखरं पतिरोषधीना –
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ।।

३. वन्दे वाञ्छितलाभाय कर्म किं तन्त्र कथ्यते ।
किं दम्पतिमिति ब्रूयामुताहो दम्पती इति ।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 4

१. उद्धूतनग.................. तिरस्कारः ।।

२. भवानलज्वाल .................. यथेच्छसि ।।

३. सुरासुर ................ चन्द्रिका ।।

**7 अनयोरन्यतरस्य कवेः देशकालकृतीः अधिकृत्य लिखत।** 4

१. जगन्नाथ पण्डितः २. माघः

8 **एकस्य लघुटिप्पणीं लिखत ।** 4

१. पर्जन्य धर्मः २. चाणक्यः

9 **चत्वारिपदानि वाक्ये योजयत ।** 4

१. अत्येति २. श्रोतुं ३. मन्यसे
४. असकृत् ५. मुक्त्वा ६. विमृशति

10 **चतुर्णां रूपाणि विवेचयत ।** 4

१. भवता २. महामतौ ३. शोभिनि
४. तरङ्गाकुल ५. मदिरया ६. पूर्वाभिलाषिणि

11 **चतुर्णां पर्यायपदानि लिखत ।** 4

१. अधोक्षजः २. शिलीमुखः ३. विभावरी
४. षट्चरणः ५. विपत्तिः ६. मित्रः

12 **द्वयोः विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 8

१. रत्नस्तम्भाः २. शापभयं
४. पयःपावकौ ४. यथेच्छं

13 **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

१. आकुलीभवन्नब्रवीत् २. एतावत्तु ३. एवमेतेषु
४. दृष्टोद्यमः ५. अविधिर्विधिः ६. राक्षसोपदेशः

14 **चतुर्थं पदं लिखत ।** 4

१. दया - प्रथमाविभिक्तिः ; मया ——— ।
२. पठ् - पठित्वा ; वद् ——— ।
३. मरालः - हंसः ; करालः ——— ।
४. दनुजः - देवः ; अनुजः ——— ।



पश्चादनुवर्तते

15 **इतरवचनरूपाणि लिखत ।** 4

१. .............. ................ सखीभिः ।
२. धीमान् ................ .............. ।
३. ................ ................. जगन्ति ।
४. अमुष्मै ................ ................ ।

16 **द्वयोः व्याकरणविशेषं निर्दिशत ।** 4

१. दिशिदिशि २. तारापतेः
३. अनिलायस्पृहयालुः ४. विषादं मा गाः

17 **रिक्तस्थानं पूरयत ।** 4

१. नहि प्रयोजनमनपेक्षमाणः .................. चाणक्यश्चेष्टते
२. कः इदानीं उष्णोदकेन ............... सिञ्चति ।
३. जानीहि मां सर्वत्र स्वतन्त्रमपि ................. ।
४. सेयं याति ................. पतिगृहं सर्वैरनुज्ञायताम् ।

18 **प्रयोगं परिवर्तयत । (एकस्य)** 2

१. धर्मो रक्षति रक्षकम् ।
२. तेन कार्यं कृतम् ।

19 **क्रियापदद्वयं सर्वपुरुषवचनेषु लिखत ।** 6

१. लभतां २. गणयामास
३. अस्तु ४. मेने

★★★★★

# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेश परीक्षा

Aug 2009 (2)

### द्वितीयपत्रिका

अङ्काः–५०

दिनाङ्कः – ३०-८-२००९

समयः–सार्धैकहोरा

अपराह्णे – १-३० तः ३-०० पर्यन्तम्

1 अ) **विषयमेकं अधिकृत्य दशभिः वाक्यैः प्रबन्धं लिखत ।** 5

१. परिसरमालिन्यम् २. ग्रन्थालयः ३. श्रीशङ्कराचार्याः

आ) **सन्नन्तधातुरूपाणि – सोदाहरणं विवृणुत ।** 4

2 अ) **अव्ययीभावसमासं सोदाहरणं विवृणुत ।** 3

आ) **अपह्नुति अलङ्कारं सोदाहरणं विवृणुत ।** 3

3 अ) **''अञ्जनाभमरविन्दलोचनम्'' – अत्रस्थं वृत्तं सलक्षणं सप्रस्तारं च निरूपयत ।** 3

आ) **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१. शृणोतु २. दास्यति ३. ददौ ४. तेने

4 **उत्तरयत ।** 4

१. ''मदेन भाति कलभः प्रतापेन महीपतिः'' – अत्र कः अलङ्कारः ?

२. दोधकवृत्तस्य लक्षणं लिखत ।

३. वद् + क्त्वा = रूपं लिखत ।

४. ''कृष्णस्य समीपं'' अस्य समस्तपदं किम् ?

5 अ) **प्रयोगपरिवर्तनं कुरुत (द्वयोः)** 4

१. रामः क्षीरं पिबति ।

२. वने सुखं भूयते ।

३. शिष्याः शालां यान्ति ।

४. गुरुभिः उपदेशः क्रियते ।

पश्चादनुवर्तते

**आ) दोषान् समीकुरुत ।** 6

१. फलानि वृक्षे पतन्ति ।
२. अर्जुनः बाणाय ताडयति ।
३. सुवर्णस्य कुण्डलं जायते ।
४. रावणः रामे क्रुध्यति ।
५. कृष्णः राधायै सह गायति ।
६. त्वत् गृहं कुत्रास्ति ?

6 **अ) मातृभाषायां अनुवादत ।** 6

१. तापसाः वने कन्दानि मूलानि च अदन्ति ।
२. ऋत्विजः प्रज्वालिते यज्ञवह्नौ हवींषि जुह्वति ।
३. कथं नाम प्रभोः आदेशमुल्लङ्घितुं शक्नुयाम् ।
४. अङ्गनाः अञ्जनेन लोचने अञ्जन्ति ।
५. पितृवधकुपितः परशुरामः कार्तवीर्यस्य भुजान् चिच्छेद ।
६. छात्राः! यूयं सदा परेषां हितमेव कुरुत ।

**आ) संस्कृतेनानुवादत ।** 6

१. ಸಾಧುಗಳು ಎಂದಿಗೂ ಸದಾಚಾರವನ್ನು ಬಿಡುವುದಿಲ್ಲ.
The good never leave their good habits.

२. ಸತ್ಪುರುಷರು ಪರೋಪಕಾರಕ್ಕಾಗಿಯೇ ಜೀವಿಸುತ್ತಾರೆ.
The great men live only to help others.

३. ಸಾಧುಗಳು ಭಗವತ್ಕಥೆಯನ್ನು ಹೇಳಿ ಜನರನ್ನು ತೃಪ್ತಿಪಡಿಸುತ್ತಾರೆ.
The good please the people by telling stories of God.

४. ಕೃಷ್ಣನು ಬೆಣ್ಣೆಯನ್ನು ಕದ್ದನು.
Krishna stole the butters.

५. ಹನುಮಂತನು ರಾಮನಿಗೆ ಸೀತಾವೃತ್ತಾಂತವನ್ನು ಹೇಳಿದನು.
Hanuman nattated the matter of Sita to Rama.

६. ಪಾಪಿಯು ಪಾಪದ ಫಲವನ್ನು ಅನುಭವಿಸುತ್ತಾನೆ.
The sinner experiences the fruits of sin.

★★★★★